श्रीमते रामानुजाय नमः ।

श्रीमते श्रीवण्शठकोपश्रीवेदान्तदेशिकयतीन्द्रमहादेशिकाय नमः ।

श्रीमते श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवकश्रीवण्शठकोपश्रीनारायणयतीन्द्रमहादेशिकाय नमः ।

# श्रीभाष्यप्रथमाध्यायतृतीयपादप्रतिपाद्यसङ्ग्रहः

शोकहर्तृपुरं प. रामानुजः

ब्रह्ममीमांसा षोडशाङ्गिभिः ब्रह्मचिन्तां विदधाति । तत्र ब्रह्मणः जगत्कारणत्वप्रतिपादकेदम्परप्रथमाध्याये तृतीयपादे जगत्कारणवादि-स्पष्टजीवादिलिङ्गकोपनिषद्वाक्यानि दशाधिकरणैः विचार्य १. द्युभ्वाद्यधिकरणे - द्युभ्वाद्यायतनं परमात्मेति विश्वात्मत्वं, २. भूमाधिकरणे - सत्यशब्दनिर्दिष्टं परं ब्रह्मैव भूमेति अनन्तभूमत्वं, ३. अक्षराधिकरणे - प्रधानस्याप्याधारतया निर्दिष्टः अक्षरः परमात्मेति नियमनधृतिकृत्त्वं, ४. ईक्षतिकर्माधिकरणे - सूरिभिर्दृश्यमानतयोक्तः परमात्मेति मुक्तभोग्यस्वभावत्वं, ५. दहराधिकरणे - दहराकाशस्य परमात्मत्वेन दह्रस्वाधारसर्वत्वं, ६. प्रमिताधिकरणे - सकलजगदीश्वरः अङ्गुष्ठप्रमितः परमात्मेति हृदयपरिमितावस्थया सर्वयन्तृत्वं, ७. प्रसङ्गात्प्राप्त-देवताधिकरणे - अर्थित्वसामर्थ्ययोः सत्त्वात् देवानामप्युपासने अधिकारोऽस्तीति देवादिभिरुपास्यत्वं, ८. प्रासङ्गिक-मध्वधिकरणे - आदित्यवस्वादीनां मध्वादिब्रह्मविद्यास्वधिकारसद्भावेन वसुमुखविबुधैः स्वात्मत्वेन सेव्यत्वं, ९. प्रासङ्गिक-अपशूद्राधिकरणे - शूद्रादीनां ब्रह्मविद्यायामनधिकारात् शूद्राद्योपास्त्यनर्हत्वं, तथा १०. अर्थान्तर-त्वाधिकरणे - नामरूपकर्तृत्वश्रवणात् आकाशः परमात्मेति च निर्णीतम् । एतदेव सारावळ्यां 'स्वनिष्ठ'त्वेन एवं सङ्गृहीतम् -

'विश्वात्मा, अनन्तभूमा, नियमनधृतिकृत्, मुक्तभोग्यस्वभावः
दह्रस्वाधारसर्वः, हृदयपरिमितावस्थया सर्वयन्ता ।
देवादीनामुपास्यः, वसुमुखविबुधैः स्वात्मभावेन सेव्यः,
शूद्राद्योपास्त्यनर्हः, प्रभुरिह बुबुधे नामरूपैककर्ता ॥' इति ।

इदानीं प्रत्यधिकरणविचारस्य सङ्ग्रहः क्रियते ॥

### ०. सङ्गतिविचारः

पूर्वतनपादद्वयेन अस्पष्टतराणि, अस्पष्टानि च जीवलिङ्गकजगत्कारणवाद्युपनिषद्वाक्यानि निरूपितानि । उत्तरत्र पादद्वयेन स्पष्टानि, स्पष्टतराणि च तानि निरूप्यन्ते । तयोः इदानीं अस्मिन् पादे स्पष्टानि बहुधा जायमानत्व, नाडीसम्बन्धादिरूप-जीवलिङ्गक-वाक्यानि विचार्यन्त इति द्वितीयतृतीयपादयोः सङ्गतिः बोध्या । पूर्वपादान्ते द्युपृथिव्यादिसम्बद्धस्य पुरुषस्य परमात्मत्वं साधितम् । तस्यात्र बहुधा जायमानत्वादिजीवलिङ्गैः आक्षिप्य समाधीयमानत्वात् पूर्वाधिकरणात् अस्याधिकरणस्य सङ्गतिश्च ॥

किञ्च, अदृश्यत्वाधिकरणे मुण्डकोपनिषद्वाक्यानां त्रैलोक्यशरीरत्वेन परमात्मपरत्वं साधितम् । तत्प्रसङ्गेन वैश्वानराधिकरणे छान्दोग्यस्थवैश्वानरविद्यावाक्यस्यापि त्रैलोक्यशरीरत्वरूपलिङ्गेन वैश्वानररूपजीवपरत्वमाशङ्क्य परमात्मपरत्वं स्थापितम् । अपितु अस्मिन् अधिकरणे प्रसङ्गात्प्राप्तोपनिषदन्तरवाक्यविचारानन्तरं अदृश्यत्वाधि-करणोक्तार्थस्थापनाय तच्छेषाभिधानेन आथर्वण-मुण्डकोपनिषत्स्थ-द्युभ्वादिवाक्यमेव समाधीयते । तर्हि कुतः अस्याधिकरणस्य पूर्वपादे वक्तव्ये सति तद्विहाय अस्मिन् पादे निवेशः इति प्रश्ने त्यक्तव्यजीवलिङ्गानां स्पष्टत्वादिति बोध्यम् । स्पष्टीभविष्यति चैतत् 'प्रकरणात्' इति सूत्रे ॥

### १. द्युभ्वाद्यधिकरणम्

आथर्वणे मुण्डके अक्षरविद्याप्रकरणे 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुः' (मु. २-२-५) इति वाक्ये द्युपृथिव्यादीनामायतनत्वेन

प्रतिपाद्यमानः प्रत्यगात्मा, उत परमात्मेति विशये, जीव इति पूर्वः पक्षः । 'अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः' (मु. २-२-६) इति उत्तरत्र, अस्मिन् मन्त्रे च नाडीसम्बन्ध, बहुधा जायमानत्व, मनःप्राणसम्बन्धरूपजीवलिङ्गदर्शनादिति । एतत् निरस्यति -

**द्युभ्वाद्यायतनं स्वशब्दात् । (१-३-१)** इति सूत्रेण । द्युभ्वादीनामायतनत्वेन उच्यमानः परमात्मैव । कुतः? स्वशब्दात् - 'अमृतस्यैष सेतुः' इति स्वासाधारणशब्देन । 'तमेवं विद्वानमृत इह भवति, नान्यः पन्थाः' (तै.आ. ३.१२) इत्यादिषु परमात्मनः एव हि मोक्षहेतुत्वं प्रसिद्धम् ।

**मुक्तोपसृप्यव्यपदेशाच्च । (१-३-२)** इति सूत्रे द्युभ्वाद्यायतनस्य मुक्तोपसृप्यत्वं, प्राप्यत्वं व्यपदिश्यमानं च तस्य परमात्मत्वं गमयति । 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीड्यं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' (मु. ३-१-३) इत्यत्र मुक्तोपसृप्यत्वमभिहितम् ।

**नानुमानमतच्छब्दात् प्राणभृच्च । (१-३-३)** इति सूत्रे, अस्मिन् प्रकरणे यथा अनुमानप्रमाणगम्यस्य प्रधानस्य वाचकशब्दाभावेन तस्य द्युभ्वाद्यायतनत्वं न शक्यशङ्कं, तथैव जीवोऽपि तद्वाचकशब्दाभावात् द्युभ्वाद्यायतनं न इत्युच्यते ।

**भेदव्यपदेशाच्च । (१-३-४)** इति सूत्रे, 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' (श्वे. ४-७) इत्यादिना प्रकृतिपरवशस्य जीवस्य शोकनिवर्तकत्वेन अस्य द्युभ्वाद्यायतनस्य भेदव्यपदेशाच्च जीवो न द्युभ्वाद्यायतनम् इति निर्णीतम् ।

**प्रकरणात् । (१-३-५)** इति सूत्रे अस्य प्रकरणस्य परब्रह्मविषयकत्वम् अदृश्यत्वाधिकरण एव प्रतिपादितत्वात् कुतः अत्र पुनरुक्तिः इति प्रश्ने उपरितनैः नाडीसम्बन्ध, बहुधा जायमानत्व, मनःप्राणाधारत्वादिभिः कैश्चित् लिङ्गैः जीवत्वशङ्कापरिहारार्थं प्रवृत्तमिदमधिकरणम् इति निगद्यते ।

**स्थित्यदनाभ्याञ्च । (१-३-६)** इत्यन्तिमसूत्रे, 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति ॥' (श्वे. ४-६) इति जीवस्य कर्मफलादनमुक्त्वा कर्मफलमभुञ्जानस्य दीप्यमानस्य परमात्मनः शरीरान्तःस्थितिं च वदन्त्या श्रुत्या द्युभ्वाद्यायतनं परमात्मैवेति सिध्यति । 'अजायमानो बहुधा विजायते' (तै.आ. ३.१३) इति रामकृष्णादिरूपेण बहुधा जायमानत्वं नाड्याधारत्वादिकं च परमात्मन एव उपपद्यन्ते इति तात्पर्यम् ॥

## २. भूमाधिकरणम्

परमात्मप्रकरणाविच्छेदेन मुण्डकोपनिषदि आपादचूडं परमात्मपरत्वं स्थापितम् । तर्हि, छान्दोग्ये भूमविद्यायां जीवप्रकरणाविच्छेदेन जीव एव प्रतिपाद्यत इति पूर्वपक्षोत्थानेन प्रमाणद्वारा सङ्गतिः ।

पूर्वाधिकरणविषयभूतमुण्डकोपनिषदि 'येनाक्षरं पुरुषं वेद सत्यम्' इति सत्याक्षरशब्दनिर्दिष्टस्य परमपुरुषस्य सत्यशब्दवाच्यत्वं भूमाधिकरणे साध्यत इति सङ्गतिः ।

छान्दोग्ये सप्तमाध्याये 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इत्यादिवाक्ये प्रस्तुतभूमगुणविशिष्टः प्रत्यगात्मा उत परमात्मेति संशयः । प्रत्यगात्मेति पूर्वः पक्षः । कुतः? 'श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकमात्मवित्' इति आत्मजिज्ञासया आश्रिताय नारदाय सनत्कुमारः नामादि प्राणपर्यन्तम् उपास्यत्वेन उपदिदेश। तत्र 'अस्ति भगवो नाम्नो भूयः', 'अस्ति भगवो वाचो भूयः' इत्यादि प्रश्नाः 'वाग्वाव नाम्नो भूयसी', 'मनो वाव वाचो भूयः' इत्यादि प्रतिवचनानि च प्राणोपदेशात्पूर्वं दृश्यन्ते । प्राणोपदेशे अस्ति भगवः प्राणाद्भूयः इति प्रश्नः तस्य प्रतिवचनं वा न दृश्यते । अतः प्राणशब्दवाच्यजीवपर्यन्तमेव आत्मोपदेशः इति प्रतीयते । ततः परमुच्यमानभूमापि जीवात्मैवेति पूर्वः पक्षः । एतन्निरस्यति -

**भूमा सम्प्रसादादध्युपदेशात् । (१-३-७)** इति । भूमगुणविशिष्टः परमात्मैव । कुतः? सम्प्रसादादध्युपदेशात् ।

सम्प्रसादः जीवः, 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेण' इति उपनिषदि सम्प्रसादशब्देन जीवस्य निर्देशात्; सम्प्रसाददधि - तस्मात् जीवादुपरि । भूमगुणविशिष्टत्वेन सत्यशब्दवाच्यस्य परमपुरुषनिर्देशात्; 'एष तु वा अतिवदति यस्सत्येनातिवदति' - 'सुखं त्वेव विजिज्ञासितव्यं', 'भूमा त्वेव विजिज्ञासितव्यः' इति विपुलसुखविशिष्टस्य 'सत्यं ज्ञानमनन्तं ब्रह्म' इति सत्यशब्दवाच्यस्य परमपुरुषस्योपदेशात् भूमशब्दवाच्यः परमात्मेति सिध्यति । प्राणशब्दवाच्य एव आत्मेति मत्वा अस्ति भगवः प्राणात् भूयः इति न पृष्टवान् । आचार्योऽपि स्वयमेव कृपया 'सत्यं त्वेव विजिज्ञासितव्यं', 'एष तु वा अतिवदति यस्सत्येनातिवदति' इत्युपदिशतीति भावः ।

**धर्मोपपत्तेश्च । (१-३-८)** इति सूत्रेण 'स भगवन् कस्मिन् प्रतिष्ठितः?' 'स्वे महिम्नि' इत्यादिषु उपदिष्टाः स्वमहिमप्रतिष्ठितत्व, सर्वकारणत्व, सर्वात्मत्वादिधर्माः परमात्मन्येवोपपद्यन्त इति भूमा परमात्मैवेति सिद्धम् ।

अस्यां विद्यायां नाम्नः आरभ्य प्राणशब्दवाच्यजीवपर्यन्तं ध्येयत्वेन सङ्गृहीतानि आचार्योक्तक्रमेण एवम् - १. नाम, २. वाक्, ३. मनः, ४. सङ्कल्पनामा, ५. चित्तम्, ६. ध्यानम्, ७. विज्ञानम्, ८. बलम्, ९. अन्नम्, १०. तोयम्, ११. तेजः, १२. आकाशः, १३. मन्मथः, १४. आशा, १५. प्राणशब्दवाच्यः जीवः । एषां सर्वेषामुपरि सत्यशब्दवाच्यपरमात्मैव भूमगुणविशिष्टः ध्येयत्वेन उच्यत इति क्रमः ॥

## ३. अक्षराधिकरणम्

एवं 'येनाक्षरं पुरुषं वेद सत्यम्' इति पूर्वतनाधिकरणेषु उक्तस्य सत्याक्षरशब्दवाच्यस्य परमपुरुषस्य सत्यशब्दवाच्यत्वं भूमाधिकरणे प्रसाध्य, अस्मिन् अक्षराधिकरणे अक्षरशब्दवाच्यत्वं स्थापयतीति सङ्गतिः ।

वाजसनेयके गार्गिप्रश्ने 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमम्' इत्यादि वाक्ये उच्यमानमक्षरं किं प्रधानम्, उत जीवः, अथवा परमात्मा इति संशयः । प्रधानमिति प्रथमः पक्षः । कुतः? 'अक्षरात् परतः परः' इत्यत्र अक्षरशब्दस्य प्रधाने प्रयोगदर्शनात् । अमुं पक्षं प्रतिक्षिपति -

**अक्षरमम्बरान्तधृतेः । (१-३-९)** । अक्षरम् - अक्षरशब्दवाच्यं, परं ब्रह्मैव । कुतः? अम्बरान्तधृतेः । अम्बरस्य आकाशस्य अन्तः पारभूतं, कारणमिति यावत् । अम्बरान्तं प्रधानं, तस्य धृतेः । 'कस्मिन्नु खल्वाकाशः ओतश्च प्रोतश्च' इत्यादिना सर्वविकारजातानां कारणभूतम् आकाशशब्दवाच्यप्रधानस्यापि आधारभूतमक्षरं न प्रधानं भवितुमर्हति । अपितु परमात्मैव प्रधानस्याप्याधारभूतः अक्षरशब्दवाच्यः इति भावः ।

तर्हि जीवस्यापि अचेतनप्रधानस्य आधारत्वं संभवतीति अक्षरशब्दवाच्यः जीवोऽस्तु इति पक्षं निरस्यति -

**सा च प्रशासनात् । (१-३-१०)** । सा च अम्बरान्तस्य प्रधानस्य धृतिः च प्रशासनात् - अस्य अक्षरस्य प्रशासनात् भवति । 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यादिषु । ईदृशस्वनियमनाधीनसर्ववस्तुविधरणं बद्धस्य मुक्तस्यापि वा न संभवति । अतः पुरुषोत्तम एव प्रशासिता अक्षरम् ।

**अन्यभावव्यावृत्तेश्च । (१-३-११)** । अन्यभावः अन्यत्वं, प्रधानत्वं जीवत्वश्चेति भावः । तस्य व्यावृत्तेः तस्याभावादित्यर्थः। अतः अक्षरं परमात्मा । 'तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ' इत्यादि, 'एतस्मिन्नु खल्वक्षरे गार्गि आकाशः ओतश्च प्रोतश्च' इत्यादिषु स्वव्यतिरिक्तैः अदृष्टः सर्वान् स्वयं प्रत्यक्षीकरोतीति श्रवणात् । एवं सर्वज्ञत्वेन, सर्वनियन्तृत्वेन सर्वाधारत्वेन च अक्षरस्य प्रधानत्वं जीवत्वं च व्यवच्छिद्यते इति हृदयम् ।

## ४. ईक्षतिकर्माधिकरणम्

'अदृष्टं द्रष्टृ' इति परमात्मनः अन्यैः अदृष्टत्वमुक्तम् । तर्हि 'पुरिशयं पुरुषमीक्षते' इति ईक्षणस्य विषयत्वेन उच्यमानः न परमात्मा इति शङ्कापरिहरणार्थं प्रवृत्तमिदमधिकरणम् ।

आथर्वणे सत्यकामप्रश्ने 'यः पुनरेतं त्रिमात्रेण ओमित्यनेनैवाक्षरेण परमपुरुषमभिध्यायीत इत्यादि .... परात्परं पुरिशयं पुरुषमीक्षते' इति वाक्ये ध्यायतीक्षणविषयत्वेन उक्तः पुरुषः जीवसमष्टिभूतः चतुर्मुखः उत परमपुरुषः

इति संशयः । समष्टिक्षेत्रज्ञः इति पूर्वः पक्षः । कुतः? 'स यो हवैतत् भगवन्' इत्यादिषु एकमात्रप्रणवोपासनस्य मनुष्यलोकप्राप्तिं फलत्वेन अभिधाय द्विमात्रोपासकस्य अन्तरिक्षप्राप्तिः त्रिमात्रप्रणवोपासकस्य ब्रह्मलोकप्राप्तिः च उक्तेति स ब्रह्मलोकः अन्तरिक्षादुपरितन-चतुर्मुखलोक एवेति प्रतीयते । तं लोकं प्राप्तेन पुरुषेण दृष्टः चतुर्मुखः इति युज्यते इति । अमुं पक्षं निरस्यति -

**ईक्षतिकर्म व्यपदेशात्सः । (१-३-१२) ।** ईक्षतिकर्म - ईक्षतेः विषयः, सः - श्रुतिप्रसिद्धः परमपुरुषः, नतु चतुर्मुखः। कुतः? व्यपदेशात् - तमोङ्कारेणैवायनेनान्वेति विद्वान्, यत्तच्छान्तमजरममृतमभयं परश्चेति शान्तत्व, अजरत्व, अमृतत्व, अभयत्व, परत्वादिधर्माणां व्यपदेशात्, कर्मवश्यस्य चतुर्मुखस्य तु शान्तत्वाजरत्वादीनाम् अयुक्तत्वात्, परमपुरुष एव मुक्तेक्षणविषयः इति भावः । अन्तरिक्षलोकादुपरि चतुर्मुखलोक इति च अयुक्तम्, महर्लोकादिसत्त्वात्। अतः, सर्वप्राकृतलोकानामुपरिस्थित-वैकुण्ठलोक एव ब्रह्मलोक इत्युच्यते । 'यत्तत् कवयो वेदयन्ते' इति सूरिभिर्दृश्यमानत्वात् न चतुर्मुखलोक इति तात्पर्यम् ॥

## ५. दहराधिकरणम्

एवं गार्ग्यक्षरविद्यायां वेद्यस्य पुरिशयपुरुषस्य परमात्मत्वं प्रसाध्य दहरविद्यायामाकाशशब्दवाच्यस्य पुरिशयपुरुषस्यापि अपरमात्मत्वं निरस्यतीति सङ्गतिः ।

छान्दोग्ये अष्टमाध्याये 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन् अन्तर आकाशः, तस्मिन् यदन्तः तदन्वेष्टव्यं, तद्वाव विजिज्ञासितव्यम्' इति वाक्ये हृदयपुण्डरीकमध्यवर्ती दहराकाशः किं महाभूतविशेषः, उत प्रत्यगात्मा, अथवा परमात्मेति संशयः । महाभूतविशेष इति प्रथमः पक्षः । कुतः? आकाशशब्दस्य भूताकाशे प्रसिद्धिप्रकर्षात्, 'तस्मिन् यदन्तः तदन्वेष्टव्यम्' इति अन्यस्य अन्वेष्टव्यस्य आधारत्वेन दहराकाशनिर्देशाच्च । अमुं पक्षं निरस्यति -

**दहर उत्तरेभ्यः । (१-३-१३) ।** दहरः - दहराकाशः परं ब्रह्मैव, नतु भूताकाशः । कुतः? उत्तरेभ्यः - अनन्तर-वाक्यस्थहेतुभ्यः । 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः', 'यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति' इत्यादिषु उत्तरवाक्येषु निरुपाधिकात्मत्व, अपहतपाप्मत्वादयः सत्यसङ्कल्पत्वादयश्च दहराकाशोपासकस्य उच्यन्ते । एते गुणाः भूताकाशस्य न युज्यन्त इति भावः । अन्वेष्टव्यत्वेन कल्याणगुणाः उच्यन्ते । 'अथ यदिदमस्मिन्' इति अधिकरणविषयवाक्यस्य अर्थः अन्ते वक्ष्यते । अथानन्तरं सूत्रम् -

**गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गश्च । (१-३-१४) ।** इतोऽपि दहराकाशः परं ब्रह्मैव । गतिश्च शब्दश्च गतिशब्दौ, ताभ्याम् । 'तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञाः उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इत्यादिषु 'एतम्' इति प्रकृतं दहराकाशं निर्दिश्य, तस्मिन् सर्वचेतनानां सुषुप्तिकाले गमनं, गन्तव्यदहराकाशस्य ब्रह्मलोकशब्देन निर्देशश्च दहराकाशः परं ब्रह्मेति साधयतः । तथा हि दृष्टम् - एवं श्रुत्यन्तरेऽपि दृष्टम्, 'एवमेवेमाः सर्वाः प्रजाः सति सम्पद्य न विदुः .... सत आगच्छामह इति, एष ब्रह्मलोकः सम्राडिति होवाच' इति श्रुतौ दृष्टम् । लिङ्गश्च - अन्यश्रुतौ न द्रष्टव्यम्, अस्याः श्रुतेः गतिः, ब्रह्मलोकशब्दोऽपि दहराकाशस्य परमात्मत्वसाधने पर्याप्तं लिङ्गमित्यर्थः ।

**धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः । (१-३-१५) ।** अस्य - परमात्मनः, धृतेः महिम्नः - जगद्विधरणरूपमहिम्नश्च, अस्मिन् - दहराकाशे, उपलब्धेः - सद्भावात् । एतन्महिमाश्रयः दहराकाशः परमात्मैव । 'स आत्मा, एष सेतुर्विधरण एषां लोकानामसंभेदाय' इत्यादिषु रूपमहिमा प्रोक्तः ।

**प्रसिद्धेश्च । (१-३-१६) ।** 'यदेष आकाश आनन्दो न स्यात्' इति श्रुतौ आकाशशब्दः परमात्मनि प्रसिद्धः । अपहतपाप्मत्वादिगुणैः सहिता प्रसिद्धिः भूताकाशप्रसिद्धेर्बलीयसीति भावः ।

एवं दहराकाशस्य भूताकाशत्वं निरस्य, इदानीं प्रत्यगात्मत्वमपि आशङ्क्य निरस्यति -

**इतरपरामर्शात्स इति चेन्नासम्भवात् । (१-३-१७) ।** 'अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय' इति वाक्यशेषे इतरपरामर्शात्, परमपुरुषात् इतरस्य जीवस्य परामर्शादिति । स इति चेत् - एषः दहराकाशः जीवात्मैवेति पक्षः, न - न घटते । कुतः? असम्भवात् - उक्तानाम् अपहतपापामत्वादिगुणानां जीवे असम्भवादिति। अत्र सम्प्रसादशब्दः भगवत्सम्बन्धज्ञानरसिकत्वेन प्रसन्नस्वभावं जीवं निर्दिशति ।

**उत्तराच्चेदाविर्भूतस्वरूपस्तु । (१-३-१८) ।** उत्तरात् - उत्तरवर्तिनः 'य आत्मा अपहतपाप्मा' इत्यादिप्रजापतिवाक्ये जीवस्यापि अपहतपाप्मत्वादयः गुणाः उच्यन्त इति जीवस्य न असंभवः इति चेत्, एतच्छङ्कां परिहरति आविर्भूतस्वरूपस्तु - पूर्वं कर्मारब्धशरीरसम्बन्धित्वेन जागरस्वप्नसुषुप्त्यादिषु वर्तमानः अनृततिरोहितापहत-पाप्मत्वादिगुणः भवन्, अनन्तरं, परञ्ज्योतिरुपसम्पत्त्या आविर्भूतस्वरूपः अपहतपाप्मत्वादिगुणकः जीवः प्रजापतिवाक्ये प्रतिपाद्यते । तु - दहराकाशस्तु अतिरोहितकल्याणगुणसागरः, मुक्तस्वरूपाविर्भावस्यापि हेतुभूतः परमपुरुषः इति सः जीवः न । मुक्तस्याप्यसम्भावितसत्यशब्दनिर्वचनसिद्धचेतनाचेतननियन्तृत्वादिभिश्च दहराकाशः न जीवात्मा ।

एवं चेत् तर्हि दहरवाक्ये 'य एष सम्प्रसादः' इति जीवप्रस्तावः किमर्थ इत्यत्राह -

**अन्यार्थश्च परामर्शः । (१-३-१९) ।** परामर्शः - दहरवाक्ये जीवपरामर्शः, अन्यार्थः - दहराकाशप्राप्त्या मुक्तस्य स्वरूपाविर्भावहेतुत्वरूपकल्याणगुणप्रतिपादनायेति ।

**अल्पश्रुतेरिति चेत्तदुक्तम् । (१-३-२०) ।** अल्पश्रुतेः - 'दहरोऽस्मिन्नन्तर आकाशः' इति दहराकाशस्य दहरत्वरूपाल्पत्वश्रवणात् तत् अल्पत्वं 'वालाग्रशतभागस्य' इत्यादिषु अणुपरिमाणत्वेनोक्तस्य जीवस्यैव सम्भवात्, सर्वस्मात् ज्यायसः ब्रह्मणः असम्भवाच्च दहराकाशः परमात्मा न, इति चेत्, तत् - अस्य उत्तरम्, उक्तम् - सर्वत्र प्रसिद्ध्यधिकरणे, 'निचाय्यत्वादेवं व्योमवच्च' इति सूत्रे उक्तम् । उपासकानुग्रहार्थम् अङ्गुष्ठप्रमितविग्रहविशिष्टत्वेन हृदये अवस्थितत्वात् दहरोऽस्मिन्निति दहरत्वमुक्तमिति भावः ।

**अनुकृतेस्तस्य च । (१-३-२१) ।** तस्य - परमात्मनः, अनुकृतेः - साम्यापत्त्या च, अनुकर्तुः जीवात् आनुकारयिता दहराकाशशब्दितपरमात्मा अन्य एवेति सिद्धम् । 'निरञ्जनः परमं साम्यमुपैति' इति हि मुक्तस्य परमात्मसाम्यं श्रूयते ।

**अपि स्मर्यते । (१-३-२२) ।** 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः' इति भगवदुपासनेन भगवत्साम्यापत्तिरूपाकारः भगवता प्रोक्तः ।

इदमत्रावधेयम् - 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इत्यनूद्य, 'दहरोऽस्मिन् अन्तर आकाशः', अस्मिन् अल्पीयसि हृदयपुण्डरीके, अन्तर आकाशः मध्यवर्त्याकाशशब्दवाच्यः परमात्मा यः, 'तस्मिन्' - दहराकाशस्वरूपे परमात्मनि, 'यदन्तः' - यत् कल्याणगुणजातम्, तत् - दहराकाशभूतपरमात्मा, तदन्तर्वर्ति-कल्याणगुणजातश्च, उभयमुपास्यमित्यर्थः । एषा यच्छब्दाध्याहारयोजना । अनध्याहारयोजनाप्यस्ति, अपितु विस्तरभयान्न लिख्यते ॥

## ६. प्रमिताधिकरणम्

अल्पश्रुतेः इति सूत्रे उक्तजीवपरिमाणत्वं कठवल्ल्यां श्रूयमाणत्वात् अङ्गुष्ठप्रमितः जीवः भवितुमर्हतीति शङ्कां अस्मिन् अधिकरणे परिहरतीति सङ्गतिः ।

कठवल्लीषु 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते ।' उत्तरत्र च, 'अङ्गुष्ठमात्रः पुरुषो ज्येतिरिवाधूमकः ।' उपरिष्टाच्च, 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः' इति आदिमध्यावसानेषु श्रूयमाणः अङ्गुष्ठप्रमितः जीवो वा उत परमात्मा इति सन्देहः । जीव इति पूर्वः पक्षः । कुतः? 'प्राणाधिपः सञ्चरति स्वकर्मभिः, अङ्गुष्ठमात्रो रवितुल्यरूपः' इति श्रुत्यन्तरे प्राणाधिपस्य जीवस्यैव अङ्गुष्ठप्रमितत्वं स्पष्टमभिहितमिति । एतत् निरस्यति -

**शब्दादेव प्रमितः । (१-३-२३) इति ।** अङ्गुष्ठप्रमितः परमात्मा, न जीवः । कुतः? शब्दादेव - परमात्मनः असाधारणभूत 'ईशानो भूतभव्यस्य' इति शब्दादेव । 'प्राणाधिपः सञ्चरति स्वकर्मभिः' इति श्रुतौ कर्मसम्बन्धरूपजीवलिङ्गवत् अत्र कठवल्लीषु परमात्मासाधारणशब्दात् परमात्मैव अत्र अङ्गुष्ठप्रमितः, नतु जीवः इति भावः । तर्हि, विभुनः परमात्मनः अङ्गुष्ठप्रमितत्वं कथं योयुज्यते इति शङ्कायां 'अल्पश्रुतेरिति चेत्तदुक्तम्' इति पूर्वोक्तं विवृणोति -

**हृद्यपेक्षया तु मनुष्याधिकारत्वात् । (१-३-२४) इति ।** तुशब्दः शङ्कां निरस्यति । हृदि - उपासकहृदये, उपासनार्थम् अल्पविग्रहविशिष्टत्वात् उपासकहृदयं तेषामङ्गुष्ठप्रमिति तदपेक्षया अङ्गुष्ठप्रमितत्वं विभुनः परब्रह्मणः उच्यते । भगवदुपासनविधायकशास्त्रं मनुष्योद्देशकमिति मनुष्यहृदयापेक्षया अङ्गुष्ठप्रमितत्वमुक्तम् ।

अस्मिन् अङ्गुष्ठप्रमिताधिकरणे चत्वारि सूत्राणि । तेषु सूत्रद्वयानन्तरं मनुष्याधिकारप्रसङ्गात् देवताधिकरणं, मध्वधिकरणम्, अपशूद्राधिकरणं च प्रासङ्गिकानि । एवं मनुष्याधिकारप्रसङ्गेन विशेषाधिकारः निरूप्यत इति सामान्याधिकारपरतृतीयाध्यायचतुर्थपादेन अस्य पादस्य न साङ्कर्यदोषः । एवं प्रसङ्गसङ्गत्या प्राप्ताधिकरणत्रये देवतासामान्यस्य उपासनसामान्ये अधिकारं स्थापयति देवताधिकरणे ।

### ७. देवताधिकरणम् (प्र)

परब्रह्मोपासनस्य मनुष्याधिकारत्वे ब्रह्मविद्यासु देवतानाम् अधिकारः अस्ति न वेति संशयः । नास्तीति पूर्वः पक्षः। कुतः? परिनिष्पन्ने सिद्धवस्तुनि ब्रह्मणि सत्यं ज्ञानमित्यादिशब्दानां बोधकत्वरूपप्रामाण्यसम्भवेऽपि देवतानां विग्रहसद्भावे प्रमाणाभावात्, मनसाऽनुष्ठीयमानोपासने देवतानामधिकारो नास्तीति । एतत् निरस्यति -

**तदुपर्यपि बादरायणः सम्भवात् । (१-३-२५) ।** तत् - ब्रह्मोपासनम्, उपर्यपि - स्वर्गलोकस्थितानां देवानां च अस्ति इति बादरायणः - श्रीवेदव्यासः मन्यते । कुतः? सम्भवात् - 'अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिषु श्रुतेन नामरूपव्याकरणेन देवतानामपि विग्रहसम्भवात् मोक्षार्थित्वम्, उपासनानुष्ठानसामर्थ्यं च शक्यमिति देवतानामपि भगवदुपासने अधिकारः सम्भवति । तर्हि,

**विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् । (१-३-२६) ।** देवतानां विग्रहवत्त्वाङ्गीकारे, कर्मणि विरोधः स्यात् - यागादिकर्मसु विरोधः भवेत् । अनेके यजमानाः अनेकान् यज्ञान् युगपत् अनुतिष्ठन्ति चेत् इन्द्रादयः कं यज्ञं गच्छेयुः? इति चेन्न, एवं विरोधः न प्रसजेत् । कुतः? अनेकप्रतिपत्तेर्दर्शनात् - योगसामर्थ्यवतां सौभरिप्रभृतीनां युगपदनेकशरीरप्रतिपत्तिः पुराणेषु दृष्टेति तद्वदिन्द्रादिदेवतानामपि अनेकदेहपरिग्रहेण युगपदनेकस्थानगमनम् उपपन्नमिति कर्मणि विरोधः न प्रसजेदिति भावः ।

**शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् । (१-३-२७) ।** विरोधः इति पूर्वसूत्रादनुवर्तते । असत्यपि कर्मणि विरोधे, शब्दे - वैदिकशब्दे विरोधः प्रसजति । कथमिति चेत्, देवतानां विग्रहाङ्गीकारे विग्रहाणां सावयवत्वेन उत्पत्तिविनाशवत्त्वात् उत्पत्तेः प्राक् विनाशात् पश्चाच्च वैदिकानामिन्द्रादिशब्दानाम् अर्थशून्यत्वं वा अनित्यत्वं वा प्रसजति इति चेन्न । तथा न प्रसजति । कुतः? अतः प्रभवात् - अतः - एभ्यः वैदिकेन्द्रादिशब्देभ्य एव, प्रभवात् - इन्द्रादिदेवतानामुत्पत्तिः इति, यथा देवदत्तादीनामुत्पत्त्यनन्तरं देवदत्तादिशब्दोत्पत्तेः ते शब्दाः अनित्याः (अभिधेयोत्पत्त्यनन्तरमभिधानमिति) । तथा अत्र न भवति । पूर्वपूर्वेन्द्रादिनाशानन्तरं नित्यभूतवेदोक्तेन्द्राद्याकारान् स्मृत्वा ब्रह्मा इन्द्रादीन् सृजतीति 'धाता यथापूर्वमकल्पयत्' इति श्रुतेः वेदानामनित्यत्वमर्थशून्यत्वं वा न भवेत् । अत्र किं प्रमाणमिति चेत्, प्रत्यक्षानुमानाभ्याम् - श्रुतिस्मृतिभ्याम्, 'वेदेन रूपे व्यकरोत् । सतासती प्रजापतिः' (तै.ब्रा. २-६-८) इत्यादिश्रुत्या; 'सर्वेषां तु स नामानि रूपाणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ।' इति स्मृतिः (म.स्मृ. १-२१) । आभ्यामेषोऽर्थः सिद्ध्यति ।

**अत एव च नित्यत्वम् । (१-३-२८) ।** अत एव च - यतः कारणात् प्रजापतिः वैदिकशब्देभ्यः जगदाकारं स्मृत्वा सृजति, अत एव च, नित्यत्वं - वेदस्य नित्यत्वं सिद्ध्यति । नैमित्तिकप्रळयानन्तरं प्रजापतिः वसिष्ठ, विश्वामित्रादिपदप्राप्तिहेतुपुण्यशालिनः जीवान् स्मृत्वा 'विश्वामित्रस्य सूक्तं भवति' (तै.सं. ५-२-१६/१७) इत्यादिकान्

वेदान् परामृश्य पूर्वकल्पविश्वामित्रादिवत् अस्मिन् कल्पेऽपि विश्वामित्रादीन् सृष्ट्वा, मन्त्रसूत्रादीनां प्रवर्तनाय नियच्छति । तेऽपि तथैव वेदप्रवचनं कुर्वन्ति । अतः वेदस्य नित्यत्वं सिद्ध्यति ।

परन्तु, प्राकृतप्रळये प्रजापतिप्रभृतयोऽपि नश्यन्तीत्यतः अव्याकृतपरिणामरूपशब्दमयानां वेदानां च नाशात् प्राकृतसृष्ट्यावृत्तौ वेदानां नित्यत्वं कथमिति शङ्कां निराकरोति -

**समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च । (१-३-२९) ।** आवृत्तावपि - प्राकृतसृष्ट्यावृत्तावपि, समाननामरूपत्वाच्च - सृज्यवस्तूनां पूर्वकल्पवर्ति-वस्तुतुल्यनामरूपभाक्त्वादेव, अविरोधः - वेदनित्यत्वस्य न विरोधः । आदिसर्गेऽपि परमपुरुषः पूर्वसंस्थानं जगत् स्मृत्वा तथैव जगत् सृजति । वेदानपि पूर्वानुपूर्वीविशिष्टान् आविष्कृत्य हिरण्यगर्भाय उपदिशति । अस्मिन् अर्थे प्रमाणप्रश्ने, दर्शनात् स्मृतेश्च - 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' इत्यादिश्रुत्या, 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुत्या, 'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथाभावा युगादिषु' इति स्मृत्या च (म.स्मृ. १-३०) । वेदस्य नित्यत्वं नाम पूर्वोच्चारणक्रमं स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वं, नतु अक्षर(वर्ण)नित्यत्वम् इति भावः ।

## ८. मध्वधिकरणम् (प्र)

पूर्वाधिकरणे देवतासामान्यस्य भगवदुपासनाधिकारः चिन्तितः । अस्मिन् मध्वधिकरणे वस्वादिदेवताविशेषाणां मधुविद्यारूपविद्याविशेषे अधिकारसद्भावः समर्थ्यते ।

छान्दोग्ये मधुविद्यायाम् 'असौ वा आदित्यो देवमधु' इत्युपक्रम्य, 'तद्यत्प्रथमममृतं तद्वसव उपजीवन्ति', इत्युक्त्वा 'स य एतदमृतं वेद वसूनामेवैको भूत्वा अग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यन्ति' इत्यादिना ऋग्यजुःसामादिवेदेषु विहितकर्मभ्यः सम्पाद्यरसस्य आधारत्वात् देवमध्विति कल्पितादित्यस्य पूर्वदक्षिणपश्चिमोत्तरोर्ध्वान् वसुरुद्रादित्य-मरुत्साध्यानां भोग्यत्वेन निर्दिश्य तैः भुज्यमानादित्यांशान् उपास्यत्वेन उपदिश्य तानादित्यांशान् प्राप्यत्वेन च उपदिशति । ईदृशमधुविद्यायां वस्वादित्यानाम् अधिकारः अस्ति न वेति संशयः । अधिकारो नास्तीति पूर्वः पक्षः। कुतः? वस्वादीनाम् उपास्ये भोक्तृत्वविशेषणतया अन्तर्भावात् स्वस्य स्वोपास्यत्वायुक्त्या, प्राप्यस्य वसुत्वस्य पूर्वमेव प्राप्तत्वाच्च । अमुं पक्षमुपन्यस्यति -

**मध्वादिष्वसम्भवादनधिकारं जैमिनिः । (१-३-३०) इति ।** मध्वाद्युपासनेषु वसूनामेव वस्वादीनामुपासनस्य असम्भवात्, कर्मकर्तृविरोधात् अयुक्तत्वादिति यावत्, अनधिकारम् - अधिकाराभावं, जैमिनिः - जैमिनिः अभिप्रैति ।

**ज्योतिषि भावाच्च । (१-३-३१) ।** ज्योतिषि - परब्रह्मणि, भावाच्च - 'तं देवा ज्योतिषां ज्योतिः' इति ब्रह्मोपासनं देवमनुष्योभयसाधारणं सदपि देवा एव ज्योतिषां ज्योतिः परं ब्रह्म उपासते इति विशेषवचनं वस्वादीनां मधुविद्यायां अधिकाराभावं द्योतयति । एतत्सूत्रद्वयं पूर्वपक्षविषयम् । इमं जैमिनिपक्षं प्रतिक्षिपति -

**भावं तु बादरायणोऽस्ति हि । (१-३-३२) ।** तुशब्दः जैमिनिपक्षं निरस्यति । भावम् - मधुविद्यादिषु वस्वादिदेवानां अधिकारसद्भावं भगवान् बादरायणो मन्यते । कुतः? अस्ति हि - वस्वादीनामपि उपास्यत्वं प्राप्यत्वं चास्ति हि। इदानीं वसवः सन्तोऽपि कल्पान्तरे वसुत्वं प्राप्यत्वेन सम्भवति । 'य एतामेवं ब्रह्मोपनिषदं वेद' इति कृत्स्नाया अपि मधुविद्यायाः ब्रह्मविद्यात्वोक्त्या वस्वादिशरीरकपरमात्मैव उपास्यः, नतु केवलवस्वादयः । अतः, स्वशरीरकपरमात्मोपासनेन कल्पान्तरे वसुत्वं च प्राप्य, तद्देहावसाने ब्रह्मप्राप्तिश्च न विरुध्यते इति भावः ।

## ९. अपशूद्राधिकरणम् (प्र)

मनुष्यातिरिक्तदेवादीनां वस्वादिदेवताविशेषाणाञ्च अर्थित्व, सामर्थ्यसद्भावात् ब्रह्मविद्यायामधिकारः उक्तः । तर्हि अर्थित्वसामर्थ्ययोः ब्रह्मविद्याधिकारप्रयोजकत्वे ब्राह्मणादीनामिव देहेन्द्रियादिपाटवरूप-उपासनानुष्ठानसामर्थ्यं, मोक्षार्थित्वञ्च संभाव्यत इति शूद्राणामपि ब्रह्मविद्यायामधिकारः संभवतीति शङ्काम् अस्मिन् अधिकरणे निरस्यतीति

सङ्गतिः ।

ब्रह्मविद्यायां शूद्रस्य अधिकारः अस्ति न वेति संशयः । अस्तीति पूर्वः पक्षः । कुतः? अर्थित्वसामर्थ्यसम्भवात् शूद्रस्य अनग्नित्वेऽपि मनसापि ब्रह्मोपासनस्य शक्यत्वात्, इतिहासपुराणश्रवणेन ब्रह्मस्वरूपादिज्ञानसम्भवात्, शूद्रयोनिगतानां विदुरादीनां ब्रह्मनिष्ठत्वस्य भारतादिषु प्रसिद्धेः, उपनिषत्सु संवर्गविद्यायाम् 'आजहारेमाश्शूद्र' इति शूद्रशब्देन जानश्रुतिं सम्बोध्य रैक्वः ब्रह्मविद्यामुपदिदेशेति च शूद्रस्याप्यधिकारोऽस्तीति ज्ञायते इति पक्षं निरस्यति।

**शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि । (१-३-३३) ।** शूद्रस्य ब्रह्मविद्यायामधिकारो नास्ति । उपासनस्य मनोवृत्तिरूपत्वेऽपि उपनीतस्य वेदाध्ययनजन्यवेदान्तज्ञानमेव भगवदुपासनस्य उपाय इति शास्त्रसिद्धम् । शूद्रस्य उपनयनादयः संस्काराः न सन्ति । वेदोपबृंहणभूतेतिहासादयोऽपि स्वतन्त्रेण ब्रह्मज्ञानोपाया न भवन्ति । विदुरादयोऽपि जन्मान्तरे ब्रह्मनिष्ठाः । संवर्गविद्यायां शूद्रेत्यामन्त्रणं च शूद्रजातियोगात् न कृतम्, किन्तु ब्रह्मज्ञानालाभनिमित्तशोकादेव । सूत्रार्थस्तु, तदनादरश्रवणात् - तयोः हंसरूपिणोः ऋष्योः अनादरवाक्यश्रवणात्, तदाद्रवणात् - तदैव रैक्वं प्रति जानश्रुतिर्नाम राजा आगतवानिति, अस्य - तस्य जानश्रुतेः, शुक् - शोकः, सूच्यते - व्यज्यते । हिशब्दः हेतुवाचकः, यस्मात् कारणात् अस्य शोकस्सूच्यते, तस्मात् कारणात् । शोकोत्पत्तेः शूद्र इति मत्वा शूद्र इति सम्बोधितवान्, नतु शूद्रजातित्वेन । अपि च,

**क्षत्रियत्वगतेश्च । (१-३-३४) ।** अस्मिन् संवर्गविद्योपक्रमे, 'जानश्रुतिर्ह पौत्रायणः बहुदायी' इत्यादिभिः दानपतित्व-बहुतर-पक्वान्नप्रदत्व-क्षत्तृप्रेषण-बहुग्रामप्रदानादिभिः अस्य जानश्रुतेः क्षत्रियत्वं गम्यते इति शूद्रेति सम्बोधनं शोकनिमित्तमिति भावः ।

**उत्तरत्र चैत्ररथेन लिङ्गात् । (१-३-३५) ।** उत्तरत्र - अस्यां विद्यायामुपरि ब्राह्मणक्षत्रियाणामेव सम्बन्धः दृश्यते । 'अथ ह शौनकं च कापेयमभिप्रतारिणश्च' इत्यादिवाक्ये अभिप्रतारीति चैत्ररथो नाम क्षत्रियः प्रस्तूयते । कुतः? चैत्ररथेन लिङ्गात् - अभिप्रतारिणः चैत्ररथत्वं क्षत्रियत्वं च कापेयसाहचर्यरूपलिङ्गेन गम्यते । अन्यस्मिन् प्रकरणे कापेयसहचारिणः चैत्ररथत्वं क्षत्रियत्वं च दृष्टम् । 'एतेन वै चैत्ररथं कापेया अयाजयन्' इत्यत्र, 'तस्मात् चैत्ररथो नाम क्षत्रपतिरजायत' इत्यत्र च । अतः अस्यां विद्यायां ब्राह्मणात् रैक्वात् अन्यः जानश्रुतिः क्षत्रिय एव भवेदिति तात्पर्यम् ।

**संस्कारपरामर्शात्तदभावाभिलापाच्च । (१-३-३६) ।** विद्योपदेशप्रकरणे 'उप त्वा नेष्ये' इति उपनयनं परामृश्यत इति, तदभावाभिलापाच्च - 'न शूद्रे पातकं किञ्चित् न स संस्कारमर्हति' (म.स्मृ. १०-१२६) इति शूद्रस्य उपनयनाभावः उक्त इति जानश्रुतिः न शूद्रजातीयः ।

**तदभावनिर्धारणे च प्रवृत्तेः । (१-३-३७) ।** 'नैतदब्राह्मणो वक्तुमर्हति' इति शूद्रत्वाभावनिश्चयानन्तरमेव ब्रह्मोपदेशकरणात् शूद्रस्य नाधिकारः ।

**श्रवणाध्ययनार्थप्रतिषेधात् । (१-३-३८) ।** 'तस्मात् शूद्रसमीपे नाध्येतव्यम्' इत्यादौ वेदश्रवणम्, अध्ययनं, वेदार्थरूपयज्ञानुष्ठानं च शूद्रस्य प्रतिषिद्धमिति च अनधिकारः ।

**स्मृतेश्च । (१-३-३९) ।** 'अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रपूरणम्' इत्यादिस्मृत्या च शूद्रस्य ब्रह्मविद्यायामधिकारो नास्तीति सिद्धम् ॥

### ६. प्रमिताधिकरणशेषः

एवं प्रमिताधिकरणे मनुष्याधिकारप्रसङ्गात्मध्ये अधिकरणत्रयं समाप्य प्रकृतस्य अङ्गुष्ठप्रमितस्य परमात्मत्वं सूत्रद्वयेन साधयति ।

**कम्पनात् । (१-३-४०) ।** 'यदिदं किञ्च जगत्सर्वं प्राण एजति', 'भयादस्याग्निस्तपति' इत्यादिना प्राणशब्दवाच्यात् अङ्गुष्ठप्रमिताद्भयात् अग्नि,वायु,सूर्यादि कृत्स्नं जगत् कम्पत इत्युक्तेः अङ्गुष्ठप्रमितः परमात्मा ।

**ज्योतिर्दर्शनात् । (१-३-४१) ।** अस्मिन् प्रकरणे 'न तत्र सूर्यो भाति न चन्द्रतारकं .... तस्य भासा सर्वमिदं विभाति' इति सूर्यादीनामपि आच्छादकनिरतिशयज्योतिषः दर्शनाच्च अङ्गुष्ठप्रमितः परमात्मेति सिद्धम् ॥ १-३-२३,२४,४०,४१ इति चत्वारि सूत्राणि अङ्गुष्ठप्रमिताधिकरणगानि । तत्र द्वितीयतृतीययोर्मध्ये देवता, मधु,अपशूद्राधिकरणानि प्रासङ्गिकानि ।

## १०. अर्थान्तरत्वव्यपदेशाधिकरणम्

एवं दहराधिकरणप्रभृति प्रसक्तानुप्रसक्त्या मध्ये चतुरधिकरणानन्तरं अङ्गुष्ठप्रमितः परमात्मेति स्थापयित्वा, पूर्वप्रकृतदहरविद्यायाः बुद्धिस्थत्वात् तदनन्तरप्रकरणस्थं दहरविद्याशेषभूतश्च 'आकाशो ह वै नामरूपयोर्निर्वहिता' इत्यादिवाक्यस्य मुक्तात्मपरत्वमाशङ्क्य तत् निराकरोतीति सङ्गतिः ।

छान्दोग्ये अष्टमाध्यायसमाप्तौ 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतम्' इत्यादिवाक्ये आकाशशब्दनिर्दिष्टः किं मुक्तात्मा उत परमात्मेति संशयः । मुक्तात्मेति पूर्वपक्षः । 'धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभि सम्भवानि' इति मुक्तात्मनः प्रकृतत्वात् । अमुं पक्षं प्रतिक्षिपति ।

**आकाशोऽर्थान्तरत्वादिव्यपदेशात् । (१-३-४२) ।** आकाशशब्दवाच्यः परमात्मा । न मुक्तः । कुतः? अर्थान्तरत्वादि-व्यपदेशात् - नामरूपनिर्वोढृत्वं, नामरूपास्पृष्टत्वं च जीवादर्थान्तरस्य परमात्मनः असाधारणभूते । तद्व्यप-देशादिति । आदिशब्देन निरुपाधिकब्रह्मत्वामृतत्वात्मत्वानि गृह्यन्ते । एभिः आकाशः परमपुरुषः इति सिद्ध्यति । 'तत्त्वमसि' इति जीवस्य ब्रह्मणश्च ऐक्योक्तेः, 'नेह नानास्ति' इति भेदनिषेधाच्च, उक्तं जीवादर्थान्तरत्वं परमात्मनः न युज्यत इति शङ्कां निरस्यति -

**सुषुप्त्युत्क्रान्त्योर्भेदेन । (१-३-४३)** इति । व्यपदेशात् इति पदमध्याहार्यम् । 'प्राज्ञेनात्मना सम्परिष्वक्तः', 'प्राज्ञेनात्मनाऽन्वारूढः' इति सुषुप्तिदशायाम् उत्क्रान्तिदशायां च अत्यन्ताज्ञात् जीवात् तदैव सर्वज्ञत्वेन ब्रह्मणः भेदेन व्यपदेशात् प्रत्यगात्मनोऽर्थान्तरभूत एव परमात्मा ।

**पत्यादिशब्देभ्यः । (१-३-४४) ।** 'सर्वस्याधिपतिः', 'सर्वस्य वशी' इत्यादिषु परिष्वज्यः प्राज्ञः पतिः, वशी, ईशानः इति निर्दिष्ट इति आकाशः परमात्मेति सिद्धम् । ऐक्योपदेशः, भेदप्रतिषेधश्च सर्वजगदन्तर्यामी एक इति, ब्रह्मशरीरकत्वरहितवस्त्वभावाच्च सङ्गताविति सर्वं खल्विदं ब्रह्म तज्जलान् इति श्रुत्या व्यक्तं प्रदर्श्यत इति भावः ॥

शुभमस्तु ॥